# Rajasvala Pujavivarna Stotram

# रजस्वला पूजाविवर्णस्तोत्रम्

## Document Information

Text title : Rajasvala Pujavivarna Stotram

File name : rajasvalApUjAvivarNastotram.itx

Category : devii, stavarAja, otherforms, devI

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Latest update : March 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 10, 2024

*sanskritdocuments.org*

# रजस्वला पूजाविवर्णस्तोत्रम्

अथ रजस्वला पूजाविवर्णस्तोत्रप्रारम्भः ।
अस्य श्रीरजस्वलामन्त्रस्यः ईश्वरऋषिः । अनुष्टुप्छन्दः ।
रजस्वला देवता । क्रौं बीजम् । क्रीं शक्तिः । क्रूं कीलकम् ।
मम रजस्वलोपासनार्थे जपे विनियोगः ॥

ऋष्यादीन् विन्यस्य ।
ॐ रजस्वला अङ्गुष्ठाभ्यां हृदयाय नमः ।
ॐ क्रौं तर्जनीभ्यां शिरसे स्वाहा ।
ह्रीं मध्यमाभ्यां शिखायै वषट् ।
क्रीं अनामिकाभ्यां कवचाय हुम् ।
क्रः कनिष्ठिकाभ्यां नेत्रत्रयाय वौषट् ।
रजस्वलायै करतलकरपृष्ठाभ्यां अस्त्राय फट् ॥

अथ ध्यानं -
बालार्कगौरवर्णाभां बालचन्द्रनिभाननाम् ।
अनन्तबाणसहितान्ध्यायेद्देवी रजस्वलाम् ॥ १॥

भगोद्भवां भगात्सर्वं त्रैकोक्यं सचराचरम् ।
सप्तपाताललोकं च सप्ताकारं भगोद्भवम् ॥ २॥

कमलञ्च भगाकारं विरिञ्चि कमलोद्भवः ।
भगवान्भगरूपस्तु नमामि भगदैवतम् ॥ ३॥

एवन्ध्यात्वा महामायां भगेपुष्पं समुद्भवः ।
इति ध्यात्वा मानसैः सम्पूज्य स्तोत्रं पठेत् ॥ ४॥

श्रीदेव्युवाच -
नमः पूजाविधिः प्रोक्ता यन्त्रपूजाविधिस्तथा ।
वदतानि महादेव योनिपूजाविधिर्मम ॥ १॥

ईश्वरोवाच-
आनीतामुत्तमान्तासां पूर्वोक्तानाञ्चनायकाम् ।
सुन्दरां यौवनोन्मत्तान्निर्लज्जां चारुहासिनीम् ॥ २॥

कृत्वा दिगम्बरान्तासाङ्गन्धकुङ्कुमचन्दनैः ।
अनुलिप्तां मुक्तकेशीन्ततस्तद्योनिमण्डले ॥ ३॥

गुरुपङ्क्तिं समाराध्य पूजयित्वा षडङ्गकम् ।
पीठपूजां समादाय तन्मध्ये चिन्तयेत्छिवाम् ॥ ४॥

अत्राप्या वाहनं नास्ति अङ्गन्या संविधीयते ।
उपचारैः पूजयित्वा अर्घ्यन्दद्यात्ततः परम् ॥ ५॥

स्मृत्वालिङ्गेश्वरन्देवं पूजयित्वा महेश्वरम् ।
गन्धपुष्पाक्षतैः पूज्यहोमं कुर्यात्ततः परम् ॥ ६॥

धर्माधर्महविर्दीप्तं आत्मानौ मनसा स्रुचा ।
सुषुम्णा वर्त्मना नित्यमक्षवृत्तिं जुहोम्यहम् ॥ ७॥

स्वाहान्ते होममन्त्रश्च प्रतिज्ञाता हुतैः शिवे ।
पूर्णाहुति रसान्ते च जुहुयान्मनुमामुना ॥ ८॥

प्रकाशाकाश हस्ताभ्यामवलम्ब्योन्मनीस्फुटम् ।
धर्माधर्मकलस्नेहं पूर्णवह्नो जुहोम्यहम् ॥ ९॥

स्वाहान्तोयं भवेन्मन्त्रो घोरपातकनाशनः ।
पूजाकालं विनानैव कुर्याच्छक्तिदिगम्बराम् ॥ १०॥

पूजाकालं विनानैव सुरादेयाहिसाधकैः ।
शिवे ज्ञानमये देहे शक्तिबुद्धिमयी तथा ॥ ११॥

शुक्रं शिवोमहादेवी शक्तिः कुण्डलिनी तथा ।
लिङ्गं शिवो महादेवी शक्तिर्योनिस्वरूपिणी ॥ १२॥

इत्येवं त्रिपुराशक्तिरित्येवं त्रिपुराशिवः ।
नानयोर्विद्यतेभेदो या शक्तिः सशिवे ध्रुवम् ॥ १३॥

श्री देव्युवाच -
त्रिधा भिन्ना यदा देव त्रिषु पीठेषु पूजयेत् ।
तानि पीठानी केष्वाह वाग्बीजेन पूजयेत् ॥ १४॥

ईश्वरोवाच-
बुद्धिरूपपरादेवी बुद्धिपीठेर्चनन्तदा ।
चिदग्नौ मनसो देवी होमश्चाग्नाहुतिस्तथा ॥ १५॥

वर्णमयितदा जाप्या जपोमानस उच्यते ।
चित्तिरूपायदा देवी शक्तिकुण्डलिनी तदा ॥ १६॥

यन्त्रे पूजा तदा ज्ञेया होमकुण्डे विधीयते ।
तत्रापि गुटिकामय्या जपश्चैवाक्षमालया ॥ १७॥

उषांशुस्थान महादेवी शीघ्रं सिद्धिप्रदायकः ।
योनिरूपायदा देवी पूजयेद्योनिमण्डले ॥ १८॥

होमसूत्रे नदेद्देवी मैथुनेन विधानतः ।
जपःकर्योमहेशानि तथैव करमालया ॥ १९॥

एतद्देवी प्रयत्नेन गोप्याद्गोप्यतरं कुरू ।
प्रकाशात्सिद्धिहानिस्यात् गोप्यात्सिद्धिमवाप्नुयात् ॥ २०॥

॥ इति श्री गर्भकुलार्णवे ईश्वरपार्वतिसंवादे
भवापूजाविवर्णं सम्पूर्णम् ॥

॥ श्री ललिताम्बार्पणमस्तु ।

Proofread by rajesh thyagarajan

*Rajasvala Pujavivarna Stotram*

pdf was typeset on March 10, 2024

Please send corrections to *sanskrit@cheerful.com*